SAMVARDHINI
PEER REVIEWED MULTILINGUAL E-RESEARCH JOURNAL
(ISSN ONLINE: - 2583-7176)
https://samvardhini.in
https://www.samskritpromotion.in

SAMVARDHINI :- 01/12/2025
Volume - 7
Issue - 2
(ISSN ONLINE :- 2583-7176)
https://samvardhini.in

# अभिज्ञानशाकुन्तलमधिकृत्यादर्शान्वेषणम्

उत्तमप्रसादः खतिवडाः

**शोधसारः**

कविकुलगुरुकालिदासविरचितं नाटकमभिज्ञानशाकुन्तलं न केवलं प्राच्यानामपितु पाश्चात्यानामपि विदुषां प्रेमास्पदं ग्रन्थरत्नमस्ति। विश्वसाहित्ये प्रसिद्धं नाटकमिदं समाजे सच्चारित्र्यं शिक्षयति । मानवनिवहानामादर्शञ्चोपदिशति । राज्ञा केन प्रकारेण भाव्यम् ? युवतीनां चरितं कीदृशमपेक्षितम् ? समाजे कथं वर्तितव्यम् ? इत्यादयः सर्वेऽपि विषया नाटककृता नाटके सन्निविष्टाः सन्ति। विषमपरिस्थितावपि सत्पुरुषाः स्वचारित्र्यं न दूषयन्ति, धर्मस्य मर्यादाया आदर्शस्य नीतेश्च मार्गो दुष्करो भवति। परं ये तस्मान्मार्गान्न विचलन्ति ते एव महत्त्वं प्राप्नुवन्ति । इत्यादयो विषया आलेखेस्मिन् विवेचिताः सन्ति । नाटके प्रदर्शिताः सर्वेऽपि विषयाः सन्दर्भाश्चादर्शोन्मुखाः परिणामे शिक्षाप्रदाश्च विद्यन्ते । मूलतो मानवेभ्यः सदुपदेशमादर्शञ्च शिक्षयति नाटकमिदमभिज्ञानशाकुन्तलमिति।

**कुटशब्दाः** - अङ्गुलीयकम्, धर्मपत्नी, वीतरागः।

**उत्तमप्रसादः खतिवडाः**
उपप्राध्यापकः
नेपालसंस्कृतविश्वविद्यालयः
अणुवाक्-संकेतः-
up.sharma977@gmail.com

**विषय-परिचयः**

महाकविकालिदासविरचितं अभिज्ञानशाकुन्तलमतिप्रसिद्धं नाटकमस्ति । नाटकमिदं न केवलं संस्कृतसाहित्येऽपितु विश्वसाहित्ये एव विख्यातं, सर्वजनविदितं च विद्यते । नाटकस्यास्य कथावस्तु महाभारताद्गृहीतमस्ति । कथेयं श्रीमद्भागवतेऽपि वर्णिता प्राप्यते (वेदव्यासः, २०७२, पृ.४१५) । अभिज्ञानशाकुन्तलमिति नामधेयं नाटकस्य कथं जातमिति सहृदयानां हृदि जिज्ञासा जागृयात् ? नाटकेनैव तत्साधुनिरूपितं विलोक्यते । राज्ञा दुष्यन्तेन शकुन्तलया सह गान्धर्वविधिना विवाहो विहितः । कतिचिद्दिनानन्तरं राजा दुष्यन्तः निजराजधानीं जगाम । गच्छता तेन स्वनामाक्षराङ्कितमङ्गुलीयकं शकुन्तलायै समर्पितम् । यदा महर्षिणा कण्वेन शकुन्तलादुष्यन्तयोर्विवाहविषयकः समाचारो ज्ञातस्ततः स्वलालिता पालिता च शकुन्तला पतिगृहं प्रेषिता । परन्तु दुर्वाससः शापकारणात् राज्ञा सा नैव स्वीकृता । शकुन्तला च राज्ञा पूर्वं प्रदत्तमङ्गुलीयकं प्रदर्श्य पूर्ववृत्तातं स्मारयितुमैच्छत् परं तदा तदङ्गुलीयकं शकुन्तलायाः पार्श्वे नासीत् । तच्च शक्रावतारे शचीतीर्थेऽभिवन्दनसमये जलेऽपतत् । ततो नष्टाशा शकुन्तला राजप्रासादान्निरगच्छत् । तस्मिन्नेवावसरे क्षणादेव तेजोमयी मूर्तिरदृश्यत । शकुन्तलां गृहीत्वा सा चादृश्यतामगात् । तदन्तरं राजपुरुषैः कस्यचित् धीवरस्य पार्श्वेऽगुलीयकं दृष्टम् । स च धीवरश्चौरबुद्ध्या राजपुरुषैर्गृहीतः । राजनामाङ्कितं तदङ्गुलीयकं च प्रधानराजपुरुषेण नृपाय दुष्यन्तायार्पितम् । यदा राजा तदङ्गुलीयकमपश्यत् ततः स्वप्रियां शकुन्तलामस्मरत् । शकुन्तलया सह विहितं गान्धर्वविवाहादिकमपि स्मृत्त्वा पश्चात्तापेन दग्धहृदयः तद्विरहेण शान्तिं नैवालभत । अनयारीत्या नाटकेऽस्मिन् अङ्गुलीयकस्याभिज्ञानात् शकुन्तलायाः ज्ञानविषयको वृत्तान्तः उपनिबद्ध इति नाटकस्य "अभिज्ञानशाकुन्तलम्" इति नामधेयमुपयुक्तमवलोक्यते । "तस्य दर्शनेन भर्त्रा कोऽप्यभिमतो जनः स्मृत इति । यतो मुहूर्तं प्रकृतिगम्भीरोऽपि पर्युत्सुकमना" (कालिदासः, २०१७, पृ. ३९५) इति राजश्यालकवचनात् नाटकस्यास्याभिधानं सार्थकतां भजते । शकुन्तलादुष्यन्तयोः कथा महाभारते पद्मपुराणे च प्राप्यते । पद्मपुराणस्य कथापेक्षया महाभारतस्य कथा प्राचीना प्रतीयते । पद्मपुराणस्य कथा महाभारतस्य कालिदासविनिर्मिताभिज्ञानशाकुन्तलस्य च कथां संयोज्य वर्णिता इव संलक्ष्यते । यतो हि अभिज्ञानशाकुन्तलस्य साररूपा एव विद्यते पद्मपुराणोक्ता । केषाञ्चन विदुषां मतमस्ति यत् -पद्मपुराणस्य बहवोंऽशाः कालिदासानन्तरमेव रचिता इति । अतः कालिदासेन स्वकीये नाटकेऽभिज्ञानशाकुन्तले महाभारतादेव कथा गृहीतेति निश्चित्य वक्तुं शक्यते । यद्यपि कविनानेन कथा महाभारतादङ्गीकृता तथापि तत्र सरसत्त्वमापादयितुं नाट्यानुकूलं विधातुं च बहुपरिवर्तनं कृतं विलोक्यते । नाटकेऽस्मिन् आरम्भात् समाप्तिपर्यन्तं सप्तसांवत्सरिकी

कथा नाटककृता सन्निबध्दानुभूयते। नाटकस्य प्रथमाङ्के राज्ञो दुष्यन्तस्य शकुन्तलया सह मेलनं जायते। तस्मिन् प्रथमे उभयोर्मेलने मिथोऽनुरागः अनन्यपरत्त्वं च सञ्जायते। तृतीयेङ्के पुनः तयोर्मेलनं तु जायते परन्तु गौतम्याः समागमनात् शारीरसम्बन्धो नैव सम्बध्यते। तृतीयचतुर्थाङ्कयोरन्तराले विष्कम्भके गान्धर्वविधिना शकुन्तलादुष्यन्तयोः विवाहो निष्पद्यते। ततो शकुन्तला च गर्भं दधे। चतुर्थाङ्कात् एतत्सर्वं ज्ञायते। पञ्चमाङ्के च राजधानीं प्रेषिता शकुन्तला दुष्यन्तेन परित्यक्ता, तस्मिन्नेव समये केनचित् ज्योतिःपुञ्जेन अदृश्यं नीता च। ततः पञ्चमाङ्कस्याङ्कावतारे राज्ञा अङ्गुलीयकं प्राप्तम्। तदभिज्ञानात् राजा शकुन्तलयाः शोकाब्धौ निमग्नः विललाप च। सप्तमाङ्के शकुन्तलया तत्पुत्रेण च सह राज्ञो मिलनं जायते। एतस्मिन् समये पुत्रस्य वयः षट्संवत्सरात्मकमनुमीयत इति नाटकस्यास्य घटनाचक्रं विचार्य समग्रं नाटकं सप्तसंवत्सरात्मकमस्तीति वक्तुं शक्यते। एतादृशं नाटकमभिज्ञानशाकुन्तलं विश्वसाहित्ये एव परिचितं वेविद्यते। नाटकेऽस्मिन्नाटककृता कालिदासेन पात्रमुखात् तेषां चरिताच्च मानवानां कृते उदात्तं चरितं प्रदर्शितमस्ति। तथा लोकोत्तरमानवादर्शोऽपि प्रकटितोऽनुभूयते। इदानीमभिज्ञानशाकुन्तलमाधृत्य तत्राभिव्यक्तानामादर्शानामनुशीलनं विधीयते।

### अध्ययनस्य समस्या

अध्ययनेऽस्मिन् निम्नाङ्किता समस्या विद्यते।

क) अभिज्ञानशाकुन्तलेऽभिव्यक्त आदर्शः कीदृशः? इति।

### अध्ययनस्योद्देश्यम्

समस्यानुसारमत्रोद्देश्यमिदमुपयुक्तं दरीदृश्यते।

क) अभिज्ञानशाकुन्तले आदर्शान्वेषणम्। इति।

### अध्ययनविधिः

अध्ययनस्यास्य सौविध्याय विशेषतः एपीए. पद्धतिस्तथा क्वचिच्छास्त्रीयपद्धतिश्चावलम्बिता विद्यते।

### अभिज्ञानशाकुन्तलाभिव्यक्तादर्शनिदर्शनम्

संस्कृतवाङ्मयं खलु मानवजीवनोपयोग्यादर्शवर्णनादिविषयेऽतिशयसमृद्धं सुस्पष्टञ्च दृश्यते। वैदिककालादेव वाङ्मयेऽस्मिन् मानवोचिता आदर्शाः प्रतिपादिताः प्राप्यन्ते।

**"मित्रस्य चक्षुषा समीक्षामहे"** (गिरिः, २०७६, पृ. १४०), **"मा गृधः कस्यस्विद्धनम्"** (ईशावास्योपनिषद् १), इत्यादिवचोभिर्वैदिकवाङ्मयं सर्वेभ्यः सदाचारमादर्शञ्च शिक्षयति। एवं **"सत्यं वद, धर्मं चर"** (गिरिः, २०७३, पृ. ११०) इत्याद्यौपनिषदी भणितिरपि आदर्शमेव द्योतयति । संस्कृतवाङ्मये प्रायः सर्वत्रैव मानवीयताया उपदेशा मन्त्रा वा समुपलभ्यन्ते, चतुर्वर्गफलसाधिनी भगवती श्रुतिरपि मानवान् सावधानं कुर्वन्ती नैकत्र निर्दिशति - जगदिदं सर्वमपीशमयमीश्वरादितरं वस्तु किमपि नास्ति । परद्रव्यलोलुपता सर्वथा क्षयकारिणी वर्तते, कदाचिदपि स्वाध्याये प्रमादो नैव करणीयः, समस्तमपि जगदिदमेकस्मिन्नेव सूत्रे निबद्धमस्तीति । सर्वथा सत्यभाषणाय, धर्माचरणायाजीवनं स्वाध्यायानुष्ठानाय समुद्योगाय चतुर्वर्गफलावाप्तये परस्परं सौहार्दपूर्णव्यवहाराय श्रुतयो मानवानुपदिशन्ति । न केवलं श्रुतय एव मानवीयतायाः पाठं पाठयन्ति अपि तूपनिषदः, श्रुत्यनुकूलाः स्मृतयो धर्मशास्त्राणि, पुराणशास्त्राणि, काव्यानि किमधिकं निखिलान्येव शास्त्राणि मानवीयादर्शस्य पाठं पाठयन्ति। तेषु नैकमपि वाक्यमधर्माचरणाय विधिविहितानुशासनभङ्गायोपदिष्टं दृश्यते। तत्र तत्र बालकावस्थातः समारभ्य पौगण्ड-कुमार-तरुण-प्रौढ-वृद्धावस्थासु क्रियमाणानां कर्तव्यानां समुल्लेखो विद्यते । आनन्दसुस्वास्थ्यदीर्घायुर्वैभवैश्वर्यादीनां दिव्यसुखानामवाप्तेरुपाया अपि शास्त्रेषूपलभ्यन्ते। काव्यानां प्रणयनं तु सरलतया मानवो मानवीयतायाः शिक्षामवाप्नुयादिति दिव्यभावं हृदि विचार्यैव भवेदिति प्रतीयते। मधुरया शैल्या बोधगम्यभाषया काव्यशास्त्राणि मानवमात्रस्य कृते चतुर्वर्गफलप्रदानाय समुपदिशन्ति । सन्दर्भेऽस्मिन् कविकुलगुरु-कालिदासप्रणीते अभिज्ञानशाकुन्तल-नामधेये विश्वविश्रुते नाटकरत्ने मानवीयताया बहूनां मानवहितसाधकानां तत्त्वानामुदाहरणानि प्राप्यन्ते, यद्यपि यदा दौहृदलक्षणामनन्यपरायणां मेनकात्मजां गान्धर्वविधिना परिणीतां स्वधर्मपत्नीं शकुन्तलां दुर्वासश्शापमोहितो राजा दुष्यन्तोऽरुन्तुदैर्वचोभिरवमाननपुरःसरं परावर्तयति गौतमीशार्ङ्गरवशारद्वतैः कण्वशिष्यैः शकुन्तलया च सप्रमाणपुरःसरं विनिवेदितैः सत्यवचोभिरपि राजा दुष्यन्तो मनागपि विचलितो न भवति- **"मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये। दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांशुलः"** (कालिदासः, २०१७, पृ. ३७७)' इति । विचारयन् निर्णयं विधातुं नहि प्रभवति। यतो हि परदाराभिमर्षणं धर्मशास्त्रेषु गर्हितम् (वेदव्यासः, २०७२, पृ. ५४२)। सतीं साध्वीमासन्नप्रसवां स्वधर्मपत्नीं नहि गृह्णाति, तत्र कथं मानवतायाः संरक्षणमभूदिति विद्यमानेऽपि सन्देहे शकुन्तलायाः तिरस्कारे दुर्वासश्शापकारणमेवास्तीति, अङ्गुलीयप्राप्तेरनन्तरं राज्ञः शकुन्तलामाश्रित्य क्रियमाणमार्मिकविलापान्निश्चीयते । विशिष्टपुरुषेण सावधानपुरःसरं कृतेऽपि प्रयत्ने कुत्रचित् त्रुटयो भवन्त्येव, अतश्च **"बलवदपि शिक्षितानामात्मनि अप्रत्ययं चेतः"** (कालिदासः,

२०१७, पृ. ८) इत्युक्तिर्नूनमेवात्र चरितार्था भवति। अतो मानवैः सर्वथा सिद्धप्रायेपि कार्ये सावधानतयैव वर्तितव्यमिति सूत्रधारोक्तौ मानवीयमूल्यं द्रष्टुं शक्यते। शकुन्तलां विलोक्य तस्या अलौकिकरूपमाधुर्ये नितरामासक्तोपि राजा शकुन्तलेयं मया पत्नीत्वेन ग्राह्या उत ग्रहीतुमयोग्येति विचारयति, विवेकी राजा दुष्यन्तः स्वात्मनि पूर्णरूपेण विश्वसिति, शकुन्तला मुनिकन्यैव स्यात्तर्हि त्वनेन प्रकारेण तस्याश्चिन्तनं सर्वथाऽनर्थकरमधर्मसाधनं च किन्तु विशुद्धं मनो मे नितरामिच्छति ताम्, मनश्च मे सर्वथा विवेकगुणसम्पन्नं विद्यते। अनेनेदं सुतरां निश्चितं भवति यत् शकुन्तलेयं नहि ब्राह्मणतनया, तत्र हेतुस्तु मदीयमार्यं विवेकगुणसम्पन्नं मनस्तस्यां नितरां रतमस्ति। वक्ति च निःसन्देहमियं शकुन्तला क्षत्रीयपरिणययोग्या, अत्र हेतुस्तु कुलीनस्य मे पवित्रं मनोऽस्यामभिलाषि वर्तते, यतो हि संशयास्पदेषु विषयेषु सतामन्तःकरणस्य व्यापारा एव निर्णायका भवन्ति । यथा- **अशंसयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः । सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः** (कालिदासः, २०१७, पृ. ४५) इति । अत्र शकुन्तलाया रूपमाधुर्ये सर्वथा निमग्नोऽपि राजा स्वकीयं चरित्रं मनागपि न जहाति, हिताहितं धर्माधर्मं च सम्यग्रूपेण विविच्यैव कार्यसम्पादने प्रवृत्तो दृश्यते । यदा हि मुनिः कण्वो गान्धर्वविधिना परिणीतां शकुन्तलां स्वपत्युः सकाशं प्रापयितुं प्रेषयितुं वेच्छति, ततश्चाद्य शकुन्तलेयं पतिगृहं गमिष्यतीति चिन्तनमात्रेण काश्यपः प्रपीडितो दृश्यते, यद्यपि चतुर्थाङ्कस्यान्तिमे पद्ये "**अर्थो हि कन्या परकीय एव तामदद्य संप्रेष्य परिग्रहीतुः। जातोऽस्मि सद्यो विशदान्तरात्मा चिरस्य निक्षेपमिवार्पयित्वा**" (कालिदासः, २०१७, पृ. ३०८) इत्यत्र कन्या परकीया एव अतस्तस्यां मोहो नितरां व्यर्थ इति सूचयति कविकालिदासः कण्वमुखेन, तथापि शकुन्तलायाः सम्भावितवियोगजन्या पीडा सर्वथा विषयपराङ्मुखं काश्यपं परिपीडयति तत्र, चिन्तयति कण्वः - अस्मिन्नहनि मे पोष्यपुत्री शकुन्तला पतिगृहं गमिष्यतीति हेतोः मनो मे दुःखेन पीडितमस्ति, मादृशस्य वीतरागस्यापि कन्याविरहजन्या पीडा ईदृशी दुःसहनीया भवति चेद्रागान्वितानां गृहस्थानां कीदृशी स्थितिर्भवेदित्याशयः । उक्तञ्च-
**यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया,**

**कण्ठस्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।**
**वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः,**

**पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः** (कालिदासः, २०१७, पृ. २७१) इति ।। अत्र विचार्यते यद् वीतरागोऽपि भगवान् कण्वः पुत्रीविरहजन्यां सुदुस्सहां पीडामनुभूय साधारणैः सांसारिकैर्विषयेऽस्मिन्ननुभूयमानां पीडां नितरामेकत्वेनानुभवति।

परदुःखस्यानुभवेन मानवीयादर्शः प्रकटितोऽस्ति। निखिलेष्वपि स्थावरजङ्गमेषु समदृष्टिर्मानवेतरप्राणिषु चात्मिकदृष्ट्या व्यवहारः तेष्वैक्यभावस्थापनं मानवीयादर्शस्य विशिष्टमुदाहरणं मन्तव्यमेव। अत्र च शकुन्तला पतिगृहगमनकाले कण्वर्षिस्तपोभूमिविद्यमानान् लतावृक्षादीन् शकुन्तलायाः पतिगृहगमनविषयकं वृत्तान्तं श्रावयन् तां च पतिगृहं गन्तुमनुमतिं प्रयच्छन् वक्ति – हे तपोवनलतातरवः शकुन्तला युष्मानकृतजलसिञ्चनात् पूर्वं या जलं पातुं न प्रवर्तते स्म, भूषणप्रियापि स्नेहवशाद्भवतां पल्लवं नहि गृह्णाति स्म, भवतां नवकुसुमप्रसूतिकाले या हर्षान्विता भवति स्म, सैषा शकुन्तला स्वपतिनिकेतनं याति भवद्भिः अनुमन्यताम्-

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या**
**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।**
**आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः**
**सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्**

(कालिदासः, २०१७, पृ. २७६) इति ॥

अत्र शकुन्तलायाः प्रकृतेश्चैकत्वेन साकमेव शकुन्तलायाः तपोवनप्राणिषु विहिता निर्मलास्तथैकत्वव्यवहारा मानवादर्शस्यानुकरणीयाः पक्षाः। पतिगृहगमनोद्यतां शकुन्तलां पिता कण्वर्षिरित्थमुपदिशति, स्वोपदेशे सर्वप्रथमं स गुरून् शुश्रूषस्व, अर्थाद् गुरुजनान् श्वशुरादीन् पूज्यान् सेवस्व, मदुक्तमुपदेशवचनं सावधानतया श्रृणु, इत्यादिभिर्वचनैस्तामनुशास्ति-

**शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने,**
**भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः ।**
**भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी,**
**यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥**

(कालिदासः, २०१७, पृ. २९७) इति॥

किमिदं मानवीयादर्शस्य विशिष्टमुदाहरणं साम्प्रतिकैरपि जनैरनुक्रियते चेत् समाजस्य कल्याणंनहिसम्भवति? तत्र तु पदे पदे मानवीयादर्शस्य मन्त्राः प्राप्यन्ते। दुष्यन्तशकुन्तलामधिकृत्य कण्वर्षिणा कृता व्यावहारिकाः सदुपदेशा मानवादर्शस्य मननीयाः विषया वर्तन्ते । नाटकस्य षष्ठेऽङ्केऽमात्यप्रेषितं पत्रमादाय प्रतिहारी समागच्छति, तत्पत्रं गृहीत्वा वाचयति च राजा। तत्रोल्लिखितं भवति- धनवृद्धिर्नाम वणिङ् नौव्यसने मृतः, स चानपत्यः, अतस्तस्य निखिलमपि

वसु राजस्वतामापद्यते नियमतस्तादृशस्यानपत्यस्य धनं राजकोशे गच्छति । " किन्तु ज्ञात्वा चैतद् वृत्तान्तमनुभूयते मया यदेष धनवृद्धिर्महाधनिकतया बहुपत्नीको भवेत्तदन्विष्यतां यदि तस्य पत्नीषु काचिदन्तर्वत्नी भवेत्, यदि भवेच्चेत् स गर्भस्थ-शिशुः पित्र्यं रिक्थमर्हति, अत्रान्तरे प्रतिहारी ब्रवीति राजानमिदानीमेव साकेतपुरस्य श्रेष्ठिनो दुहिता निवृत्तपुंसवना तस्य जाया श्रूयते देव! । धर्ममर्मज्ञो राजा तस्य स्वामी स एव गर्भस्थ-शिशुरेवेति निश्चित्य तदनुकूलमादिशति । अत्र मानवीयादर्शस्य महान्तो गुणा दृष्टिपथे समायान्ति राज्ञो धर्माधर्मनिर्णये । सन्दर्भेऽस्मिन्नेव प्रजावत्सलो राजा दुष्यन्तः प्रतिहारिणमिदमुद्घोषयितुमादिशति यद्देशेऽस्मिन् मम यावन्तो देशवासिनः सन्ति तेषु यो येन स्वप्रियेण बान्धवेन वियुक्तो भवेत् तत्र ऋते पापात् (पापकर्म परित्यज्य) सर्वेषां प्रियबन्धुरयं दुष्यन्त इति-

**येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना ।**
**स स पापादृते तासां दुष्यन्त इति घुष्यताम्**

(कालिदासः, २०१७, पृ. ४७२)॥

कथनस्यायमाशयो भवेत् कवेः, पापादृते इति पदेन यद् यस्य पिता पुत्रादयः सम्बन्धिनो मृतास्ते दुःखिनो न भवेयुः तेषां पिता पुत्रः शिष्यरूपेणाहं वर्ते, अहं तस्य पुत्रः, अहं पिता बन्धुरिति, किन्तु यस्याः पतिर्मृतश्चेदहं तस्य पतिः कदापि नहि भवितास्मि अत्र पापमस्ति । अत्र दुष्यन्तस्य व्यवहारेऽतुलनीयो मानवादर्शः परिदृश्यते । एवंविधा राजान इतिहासे विरला एवाभूवन् । यदा चैन्द्रं कार्यं परिसमाप्य पृथिव्यामवतरणसमये तपस्विनां साधनास्थलीभूते हेमकूटनाम्नि किम्पुरुषवर्षे तपसि रतं सुरासुरगुरुं सपत्नीकं काश्यपमुनिं द्रष्टुमैच्छन् मातलितो लब्धपरिचयो दुष्यन्तः, तदा वक्ति मातलिनं ह्यनतिक्रमणीयानि श्रेयांसि प्रदक्षिणीकृत्य भगवन्तं गन्तुमिच्छामीति । एष राजा कण्वमारीचयोर्ब्रह्मर्ष्योर्नितरां कृपाभाक् कथमपि तपोरतानामृषीणां दर्शनं करोत्येव, यतश्च स सम्यग् जानाति ऋषिप्रभावः। अतश्च भगवन्तं काश्यपमुनिं प्रदक्षिणीकृत्य गन्तुमैच्छद्राजा मानवीयादर्शस्य नितान्तमुत्कृष्टतममुदाहरणमिदं साम्प्रतमप्यस्मान् विनम्रतायाः पाठं पाठयति । शकुन्तलाया निखिलमपि जीवनं, त्यागस्य भावः, सहनशीलतायाः पराकाष्ठा सत्यवादिताप्रभृतयो गुणा मानवसमाजस्य नितरामुपयोगिनो दृश्यन्ते। यदा दुर्वासश्शापमोहितो राजा दुष्यन्तः शकुन्तलामुपेक्षते मानवकर्तव्ये दोषभावं विलोकयन्ती क्रोधान्विता शकुन्तला राजानं वाग्बाणैरधिक्षिपति । यूयमेव प्रमाणं जानीथ- धर्मस्थितिञ्च लोकस्य, लज्जाविनिर्जिता जानन्ति न किमपि स्त्रियः (कालिदासः, २०१७, पृ. ३६६) इति । अस्याशयोऽयमस्ति भवन्त एव विधिनिषेधात्मकं शास्त्रं लोकधर्ममर्यादाञ्च जानन्ति। लज्जाविवशाः स्त्रियस्तु न किञ्चिदपि

जानन्ति, इत्थं भवतो लोकविश्रुतं विशुद्धं चरित्रं कथं वाहमवगन्तुं प्रभवामि ? भवदीयं प्रथितं दुष्यन्तस्य चरितम् इति यद् भवता प्रोक्तं तच्च कथमहं स्वीकुर्याम्। वाग्बाणैः परिपीडिता शकुन्तला यदा शारद्वतादीननुगन्तुं सुनिश्चितवती, किन्तु त्वमत्रैव तिष्ठेति गुरुसमेन गुरुशिष्येण प्रोक्ता सा बाष्पयुक्तां दृष्टिं क्रूरे मयि समर्पितवती किन्तु मया परस्त्रीसंसर्गजन्यपापभयात् सा प्रत्यादिष्टा तत् सर्वमेव वृत्तं विषाक्तं शल्यमिव मां निर्दहति, तदानीं माधव्यो विदूषकः जिज्ञासते- अस्ति मे तर्कः, केन पुनस्तत्रभवती आकाशसञ्चारिणा नीतेति ? तमुत्तरयन् ब्रवीति राजा कः पतिव्रतां तामन्यः परामर्ष्टुमुत्सहते, मेनकया नीता भवेदिति शङ्कते मनो मे। तदा शकुन्तलानुचिन्तया व्याकुलं राजानं समाश्वासयन्नब्रवीद्विदूषकः चिन्ता भवता नैव करणीया, तया सह नूनमेव यथाकाले मिलनं भविष्यति, यतो न खलु मातापितरौ भर्तृवियोगदुःखितां दुहितरं चिरं प्रेक्षितुं पारयतः । अत्र मेनका भवन्तमवश्यमपि न हि द्वेष्टि, सा शकुन्तलायाः पतिवियोगजन्यं मलिनं मुखं द्रष्टुं नहि पारयति । अत्र मानवीयसमवेदनाया उत्कृष्टमुदाहरणं दृश्यते। अनेन प्रकारेण अभिज्ञानशाकुन्तलनाटके स्थले स्थले मानवीयादर्शस्य समुत्कृष्टमुदाहरणं दृश्यते ।

**उपसंहारः**

कालिदासविरचितंनाटकमभिज्ञानशाकुन्तलंसर्वविदितमुत्कृष्टंनाटकमस्ति।कालिदासस्य कृतिषु नाटकमिदं सर्वातिशायि वेविद्यत इति काव्येषु नाटकं रम्यम् इत्युक्तिरेव प्रमाणयति । नाटकेऽस्मिन् कविना मानवीयादर्शस्य बहूनि उदाहरणानि प्रस्तुतानि सन्ति । तथा बहूनां मानवहितसाधकानां तत्त्वानामुदाहरणानि चात्र प्राप्यन्ते, यद्यपि यदा दौहृदलक्षणामनन्यपरायणां मेनकात्मजां गान्धर्वविधिना परिणीतां स्वधर्मपत्नीं शकुन्तलां दुर्वासश्शापमोहितो राजा दुष् यन्तोऽरुन्तुदैर्वचोभिरवमाननपुरःसरं परावर्तयति तदा गौतमीशार्ङ्गरवशारद्वतैः कण्वशिष्यैः शकुन्तलया च सप्रमाणपुरःसरं विनिवेदितैः सत्यवचोभिरपि राजा दुष्यन्तो मनागपि नैव विश्वस्तवान् जायते । एतत्सर्वं विलोक्य कण्वशिष्याणां कथनं श्रुत्वापि निर्णयं विधातुं राजा नहि प्रभवति। यतो हि परदाराभिमर्षणं धर्मशास्त्रेषु गर्हितमस्ति । स्वकीयां प्रियां शकुन्तलां निजपत्नीत्वेनाज्ञात्वा साध्वीमासन्नप्रसवां स्वधर्मपत्नीमपि नहि गृह्णाति, तत्र कथं मानवतायाः संरक्षणमभूदिति विद्यमानेऽपि सन्देहे शकुन्तलायाः तिरस्कारे दुर्वासश्शापकारणमेवास्तीति, अङ्गुलीयप्राप्तेरनन्तरं राज्ञः शकुन्तलामाश्रित्य क्रियमाणमार्मिकविलापाच्छकुन्तलोपरि राज्ञः वास्तविकी प्रीतिरस्तीति निश्चीयते। विशिष्टपुरुषादपि सावधानपुरःसरं कृतेऽपि प्रयत्ने कुत्रचित् त्रुटयोभवन्त्येव,अतश्च"बलवदपि शिक्षितानामात्मनि अप्रत्ययंचेतः"इत्युक्तिर्नूनमेवात्रचरितार्था भवति। अतो मानवैः सर्वथा सिद्धप्रायेऽपि कार्ये सावधानतयैव वर्तितव्यमिति सूत्रधारोक्तौ

मानवीयादर्शः द्रष्टुं शक्यते। शकुन्तलां दृष्ट्वा शकुन्तलाया रूपमाधुर्ये सर्वथा निमग्नोऽपि राजा स्वकीयं चरित्रं मनागपि न जहाति, हिताहितं धर्माधर्मं च सम्यग्रूपेण विविच्यैव कार्यसम्पादने प्रवृत्तो दृश्यते। पतिगृहगमनोन्मुखां शकुन्तलां दृष्ट्वा महर्षिः कण्वो विचारयति यत्-अस्मिन्नहनि मे पोष्यपुत्री शकुन्तला पतिगृहं गमिष्यतीति हेतोः मनो मे दुःखेन पीडितमस्ति, मादृशस्य वीतरागस्यापि कन्याविरहजन्या पीडा ईदृशी दुःसहनीया भवति चेद्रागान्वितानां गृहस्थानां कीदृशी स्थितिर्भवेत् । वीतरागोऽपि भगवान् कण्वः पुत्रीविरहजन्यां सुदुस्सहां पीडामनुभूय साधारणैः सांसारिकैर्विषयेऽस्मिन्ननुभूयमानां पीडां नितरामेकत्वेनानुभवति। परदुःखस्यानुभवेन मानवीयादर्शः प्रकटितोऽस्ति । निखिलेष्वपि स्थावरजङ्गमेषु समदृष्टिर्मानवेतरप्राणिषु चात्मिकदृष्ट्या व्यवहारः तेष्वैक्यभावस्थापनं मानवीयादर्शस्य विशिष्टमुदाहरणं मन्तव्यमेव । अत्र च शकुन्तला पतिगृहगमनकाले कण्वर्षिस्तपोभूमौ विद्यमानान् लतावृक्षादीन् शकुन्तलायाः पतिगृहगमनविषयकं वृत्तान्तं श्रावयन् तां च पतिगृहगन्तुमनुमतिं प्रयच्छन् वक्ति - हे तपोवनलतातरवः शकुन्तला युष्मानकृतजलसिञ्चनात् पूर्वं या जलं पातुं न प्रवर्तते स्म, भूषणप्रियापि स्नेहवशाद्भवतां पल्लवं नहि गृह्णाति स्म, भवतां नवकुसुमप्रसूतिकाले या हर्षान्विता भवति स्म, सैषा शकुन्तला स्वपतिनिकेतनं याति भवन्तोऽनुमन्यताम्, इत्यत्र शकुन्तलायाः प्रकृतेः साकम्, तपोवनप्राणिषु विहिता निर्मलव्यवहारा मानवादर्शस्यानुकरणीयाः पक्षाः सन्ति। पतिगृहगमनोद्यतां शकुन्तलां वीक्ष्य पिता कण्वः - गुरून् शुश्रूषस्व, अर्थाद् गुरुजनान् श्वशुरादीन् पूज्यान् सेवस्व, मदुक्तमुपदेशवचनं सावधानतया श्रृणु, इत्यादिभिर्वचनैस्तामनुशास्ति । तत्र प्रस्तुतमुपदेशवचनं मानवादर्शस्य विशिष्टमुदाहरणं विद्यते । साम्प्रतिकैरपि जनैस्तदनुक्रियते चेत् समाजस्य कल्याणं किं न सम्भवति ? अतोऽभिज्ञानशाकुन्तले महाकविकालिदासेन यादृशं चरितं प्रकटितं पात्राणां माध्यमेन ये ये मानवीयादर्शाः प्रकटितास्ते सर्वेऽप्यनुकरणीया मननीयाश्च विद्यन्ते।

## सन्दर्भग्रन्थसूची


ईशावास्योपनिषद्. (२०६०). गोरखपुरः गीताप्रेस।

कालिदासः. (२०१७). **अभिज्ञानशाकुन्तलम्.** वाराणसी चौखम्बा संस्कृत सीरिज।

**तैत्तिरीयोपनिषद्.** (२०३६). वाराणसी महेश अनुसन्धान संस्थान।

गिरिः, केशवानन्दः. (२०७६). **शुक्लयजुर्वेदसंहिता.** देवघाटः गुरुकुल प्रकाशन।

गिरिः, रामानन्दः. (२०७३). **ईशादि दश उपनिषद्.** देवघाटः महेश सन्यास आश्रम।

वेदव्यासः. (२०७२). **श्रीमद्भागवतमहापुराणम्.** गोरखपुरम् गीताप्रेस।